*IOSR Journal of Humanities and Social Science (IOSR-JHSS)*
*Volume 31, Issue 5, Series 1 (May, 2026) 111-118*
*e-ISSN: 2279-0837, p-ISSN: 2279-0845.*
*www.iosrjournals.org*

# अग्निपुराणे वर्णिताः समासनियमाः : पाणिनीयदृष्ट्या परीक्षणम्

Arpita Banik[1], Dr. Vikash Arya[2]
*[1,2] Department of Sanskrit, Mansarovar Global University, Sehore, MP, India*

***संक्षिप्तसारः* -** *विश्वस्य प्राचीनातमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा। भाषायामस्यामेव एकशतमध्वर्युशाखा, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽथर्वाणो वेद इति महाभाष्योक्ताभिः[1]1131 शाखाभिः समन्विताः ऋग्यजुः सामाथर्वाणो वेदाः शिक्षाकल्पनिरुक्तछन्दोज्योतिर्व्याकरणाख्यैः षड्भिः वेदाङ्गैस्समेधिता विराजन्तेतराम्। एतेषां प्रतिवेदानां अर्थावगमनाय षड्वेदाङ्गानि तथा षडङ्गानि सन्ति। तेषु षडङ्गेषु व्याकरणमेव वेदपुरुषस्य मुखरूपेण कल्प्यते। तदुच्यते* ***... मुखं व्याकरणं स्मृतम्***[2] *इति। स्कन्धमते* ***व्याकरणं सारं सिद्धस्वरूपकम्***[3] *इति। कात्यायनविबोधाय बालानां बोधाय च स्कन्धमहोदयः व्याकरणशास्त्रस्य सारं कथयितुमचिकीर्षत्। इह खल्वस्मिन् व्याकरणशास्त्रे प्रत्याहार-सन्धि-शब्दरूप-अव्य-कारक-समास-तिङ्-कृत्-इत्यादयः विविधविषयाः सुपरिवेशिताः सन्ति।*

*साम्प्रतं व्याकरणसमन्वितस्य वेदाङ्गस्य प्रतिनिधिभूतमेकमेव व्याकरणमस्ति पाणिनीयं व्याकरणम्। महर्षिणा पाणिनिना अनुमानतः सहस्रचतुष्टयैः स्वल्पाक्षरसूत्रैः संस्कृतभाषायां नितान्तं वैज्ञानिकं व्याकरणं प्रस्तुतीकृत्य विदुषः आश्चर्ये निपातिताः। वैज्ञानिकदृष्ट्या देवभाषाया यथा मनोहरं शास्त्रीयं विवेचनं महर्षि-पाणिनिना कृतं तादृशं विवेचनमन्यत्र नोपलब्धमस्ति। यथा व्याकरणसाहित्ये अष्टाध्यायी, तथा अष्टादशमहापुराणेषु अग्निपुराणं तु एक एवान्यतमं महापुराणम्। तत्र विविधेषु वर्णितेषु विषयेषु व्याकरणशास्त्रं त्वेकमेव। व्याकरणशास्त्रेषु तत्र प्रत्याहार-लिङ्गत्रय-सन्धि-सुप्-तिङ्-कारक-समास-तद्धित-कृत्-उणादीनां विवरणमस्ति।*

*इदानीम् आधार एव आधेयस्य आश्रयस्वरूपः। यदि आधार एव भिन्न स्यात्तर्हि आधेयोऽपि भिन्नो भवति इति साधारणो नियमः। आधारवैचित्र्ये सति आधेयवैचित्र्यं प्रतिफलितमिति निश्चितरूपेण वक्तुं युज्यते। प्रतिग्रन्थेषु विषयवर्णनं स्वाभाविकतया स्वकीयरीत्या स्वकीयपरम्परया च विहिता। विषयवर्णने तत्रातीव वैचित्र्यमस्तीति स्वाभाविक एव। व्याकरणगतेषु विविधेषु विषयेषु समासमवलम्ब्य अष्टाध्यायी-अग्निपुराणयोः तुलनात्मकसमीक्षा एव गवेषणापत्रस्यास्य मुख्योद्देश इति॥*

***सूचीमुखशब्दाः* - संक्षिप्तसारः, अवतरणिका, संस्कृतव्याकरणसाहित्ये समासाः, अग्निपुराणे वर्णिताः समासाः पाणिनीयदृष्ट्या तत्परीक्षणञ्च, उपसंहारः, शब्दसंक्षेपः, ग्रन्थविवरणपञ्जी***

**अवतरणिका –**

***सर्वासामपि भाषाणां जनानां जीवनं यतः। भासते संस्कृतं तेन शरीरस्य यथासवः॥***
***यस्यां मुनीनां विदितं निबद्धं, यस्यां च बद्धं गदितं मुनीनाम्।***
***ज्ञानञ्च विज्ञानमयं विशेषात् सा संस्कृता वाग्भुवि पूजितास्ति॥***

विश्वस्य प्राचीनातमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा। वैदिकसाहित्यं लौकिकसाहित्यञ्च भाषया अनया सुग्रथितम्। साक्षात्कृतधर्मैर्भारतीयमणीषाभिः अध्यात्मशास्त्रानुभूततत्त्वस्य फलं खलु विशालो विमलः शब्दराजिर्वेदः। *वेदोऽखिलो धर्ममूलम्*।[4] मन्त्रब्राह्मणात्मकः[5] सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते। इदमपि सत्यमतिरोहितमेवास्ति यच्छिक्षादि षडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं ज्ञातुमशक्यमेव। संहिता-ब्राह्मण-आरण्यक-उपनिषद्-भेदेन वेदस्य चातुर्विध्यं प्रतिपादितमृषिभिः। पुनरपि संहिता एव ऋक्-साम-यजुः-अथर्वभेदेन चतुर्धा विभज्यते। प्रतिवेदानामेतेषां वेदाङ्गान्यपि सन्ति। वेदाङ्गानि तु षडेव – शिक्षा-कल्प-निरुक्त-व्याकरण-छन्दः-ज्योतिष-भेदैः। एतेषु व्याकरणमेव वेदपुरुषस्य मुखस्वरूपम्। तदुच्यते ***... मुखं व्याकरणं स्मृतम्***[6] इति। बहवो व्याकरणग्रन्थाः तत्र सन्ति। तद्यथा – अष्टाध्यायी, मुग्धबोधः, कातन्त्रः, चान्द्रः, सरस्वतीकण्ठाभरणम् इत्यादयः। तेषु व्याकरणग्रन्थेषु शब्दरूपाणि, धातुरूपाणि, सन्धिः, कारकः, समासः, कृत्प्रत्ययाः, तद्धितप्रत्यया इत्यादि विविधाः विषयाः स्व-स्व-रीत्या आलोचिता इति दरीदृश्यन्ते। एतेषु व्याकरणग्रन्थेषु महर्षिपाणिनिविरचितस्य *अष्टाध्यायी* इति ग्रन्थस्य रचनाकाल एव ख्रीष्टपूर्व-षष्ठ-पञ्चम-शतकम्।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् इति वेदानां समुपबृंहकत्वेन पुराणसाहित्यस्यापि वेदोपकारकत्वं वर्तते। श्रुतानीह पुराणानि सेतिहासानि चानघ इत्यादिवाक्यादितिहासस्यापि पुराणसहचरत्वेन वेदोपकारकत्वं सिद्धमेव। पुरा भव पुराणमिति विग्रहे पुराणशब्दो निष्पद्यते। अपि च, पुरा नवं भवति[7] इति पुराणम्। पुराणस्य अष्टादशत्वं प्रसिद्धं ब्राह्मं पाद्मं वैष्णवञ्चादिभेदेन[8]। पुराणेष्वमीषु अग्निपुराणं खलु अतीवप्रसिद्धमिति। अग्निपुराणस्य समयकाल एव नवमशतकम्। अष्टादशमहापुराणेषु अग्निपुराणेऽपि व्याकरणविषयेषु प्रत्याहार-

---

[1] पस्पशा, दण्डस्वामी दामोदर आश्रम, पृष्ठा - 186

[2] पा.शि. – 41-42

[3] अग्नि. – 349.1

[4] मनु. - 2.6

[5] मन्त्रब्राह्मणयोर्वेदनामधेयम् (आपस्तम्ब-यज्ञपरिभाषासूत्रम् – 2.6.3)

[6] पा.शि. – 41-42

[7] नि.– 3.4.19.2

[8] *मद्वयं भद्वयञ्चैव बत्रयं वचतुष्टयम्। अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक्॥* (देवी. – 1.3.21) इति। अर्थात् – क) म-द्वयम् – मत्स्यपुराणम्, मार्कण्डेयपुराणम् ख) भ-द्वयम् – भविष्यपुराणम्, भागवतपुराणम् ग) ब-त्रयम् – ब्रह्मपुराणम्, ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम् घ) व-चतुष्टयम् – वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, वायुपुराणम् ङ) अ. – अग्निपुराणम् च) ना. – नारदपुराणम् छ) प. – पद्मपुराणम् ज) लिङ् – लिङ्गपुराणम् झ) ग.– गरुडपुराणम् ञ) कू.– कूर्मपुराणम् ट) स्क.– स्कन्दपुराणम् इति।

सन्धि-कारक-समास-शब्दरूप-तिङ्-कृत्-इत्यादि विषये विस्तृतालोचना समुपलभ्यतेऽस्माभिः । तत्र ख्रीष्टपूर्व-षष्ठ-पञ्चम-शतकस्थितेन महर्षिपाणिनिविरचितेन *अष्टाध्यायी*-इति ग्रन्थेन सह ख्रीष्टीयनवमशतकस्य अग्निपुराणगतस्य व्याकरणविषयस्य तुलनात्मकसमीक्षा एव मनसि जायते । परन्तु लघुकलेवरेऽस्मिन् गवेषणापत्रे केवलमुभयोः ग्रन्थयोः समासविषये तुलनात्मकसमीक्षा विहिता जातेति ।

**संस्कृतव्याकरणसाहित्ये समासाः –**

सम्-पूर्वकेन दिवादिगणीय-अस्-धातुना सह घञ्-प्रत्यययोगेन समास-शब्दो निष्पद्यते । **समसनम्** – **एकत्रनिक्षेपः – एकत्रस्थापनम्** इति । अत एव समास-शब्दस्य अर्थस्तु **संक्षेपः-** इति कथितुं शक्यते । संक्षेपस्तथा एकार्थीभावविषये पाणिनिसूत्रं तु **समर्थः पदविधिः**[9] इति । समर्थः समर्थाश्रितः (लाक्षणिकः प्रयोगः) । व्याकरणशास्त्रे यः कश्चित् पदविधिः श्रूयते स समर्थाश्रितो बोध्यः । पदयोः पदानां वा विधिः, पदविधिः, स बि समासादिः । वर्णविधौ सन्धौ नायं नियमः प्रयुज्यते । सामर्थ्यमिह **द्विविधम्** – **व्यपेक्षालक्षणम् एकार्थीभावलक्षणं** च ।

व्यपेक्षालक्षणम् – स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षायोग्यतासत्तिवशात् यः परस्परसम्बन्धः सा हि व्यपेक्षा । अपेक्षायां सत्यां यो यः सन्निहितो योग्यश्च, तेन तेन सम्बन्धो व्यपेक्षया अभ्युपेयते । यथा – राज्ञः पुरुषः इति ।

एकार्थीभावलक्षणं – एकार्थीभावस्तु राजपुरुष इत्यादि-वृत्तावेव । स च प्रक्रियादशायां पृथगर्थत्वेन प्रथमगृहीतस्य विशिष्टैकार्थत्वरूपः इति ।

पूर्वमुच्यते अपेक्षायां सत्यां यो यः सन्निहितो योग्यश्च, तेन तेन सम्बन्धो व्यपेक्षया अभ्युपेयते । यथा – राज्ञः पुरुषः इति । व्यपेक्षा-विहीनयोः पदयोर्मध्ये समासो न स्यात् । देवदत्तस्य गुरुकुलम् इति उदाहरणे देवदत्तस्य-इति पदेन सह गुरु-इति पदस्य व्यपेक्षासामर्थ्ये सत्यपि पदद्वयं (देवदत्तस्य गुरुकुलम्) भिन्नम् । ईदृशेषु स्थलेषु **सापेक्षत्वेऽपि गमकत्वात् समासः** इति नियमः प्रयुज्यते । सापेक्षं नाम **युक्तार्थघटकीभूतपदातिरिक्तपदसम्बन्धित्वं सापेक्षत्वम्** इति । सापेक्षत्वे अनुपस्थिते सति समासः प्रत्ययो वा न भवति ।

वस्तुतः, समसनम् – ऐक्यपद्यं समासः, पदद्वयस्य बहुपदस्य वा एकपदत्वं समास इति । समर्थानां परस्परसम्बद्धार्थानां पदानां समासो भवति । समासफलं तु ऐक्यपद्यम्, ऐकस्वर्यम्, एकार्थीभावश्च इति । समासः प्रायेण **चतुर्विधः** – **अव्ययीभावः**, **तत्पुरुषः**, **बहुव्रीहिः**, **द्वन्द्वः** चेति । एतेषां विषयात् बहिर्भूतानामपि **सह सुपा** इति समासविधानात् **पञ्चविध** एवायं वक्तुं युज्यते ।

संक्षेपेण अव्ययीभावादीनां चतुर्णां समासानां लक्षणं तु – **पूर्वपदार्थप्रधानः अव्ययीभावः**, **उत्तरपदार्थप्रधानः तत्पुरुषः**, **अन्यपदार्थप्रधानः बहुव्रीहिः**, **उभयपदार्थप्रधानो द्वन्द्वः** इति । तत्पुरुषविशेषः कर्मधारयः तद्विशेषो द्विगुः । तदर्थं ***समासश्चतुर्विध इति तु प्रायोवादः*** इति प्रसिद्धम् ।

समासस्य अन्यथा षड्विधत्वं प्रतिपादितं –

***सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा । सुवन्तेनेति विज्ञेयः समासः षट्विधो बुधैः ॥*** इति ।

वैयाकरणाः समासं षड्विधं जानन्ति । यथा – **सुपां सुपा, सुपां तिङा, सुपां नाम्ना, सुपां धातुना, तिङां तिङा, तिङां सुपा** इति । उदारहणानि यथाक्रमं **- सुपां सुपा** – राजपुरुषः (राज्ञः पुरुषः), **सुपां तिङा** – **पर्यभूषयत्** (परि अभूषयत्), **सुपां नाम्ना** – कुम्भकारः (कुम्भ करोतीति कारः), **सुपां धातुना** – कटप्रूः (कट प्रूः) (प्रवते), अजस्रम् (नञ् +जस्र – जसु+र), **तिङां तिङा** – पिवतखादता (पिवत + खादत), खादतमोदता (खादत मोदत), **तिङां सुपा** – कृन्तविचक्षणा (कृन्त+ विचक्षण) इति ।

समासे तथा समाससूत्रे प्रथमया विभक्त्या निर्दिष्टं पदम् उपसर्जनम् उच्यते । सूत्रितं – **प्रथमानिर्दिष्टं समास उपसर्जनम्** [10] इति । समासे उपसर्जनं प्राक् प्रयोज्यम्, यथा – व्याघ्रभयम्, उपकुम्भम् इत्यादि । सूत्रं – **उपसर्जनं पूर्वम्** [11] इति । पुनश्च, समासवाक्ये यत् नियतैकविभक्तिकं तदपि उपसर्जनम् उच्यते, उपसर्जनस्यास्य पुर्वनिपातो मा भूदिति । सूत्रं तु **एकविभक्ति चापूर्वनिपाते** [12] इति । यथा – निर्गतः कौशाम्ब्याः **-** निष्कौशाम्बिः, निर्गतं कौशाम्ब्याः – निष्कौशाम्बिं इत्यादि । इदानीम् –

**अग्निपुराणे वर्णिताः समासाः पाणिनीयदृष्ट्या तत्परीक्षणञ्च –**

पूर्वमुक्तं यत् अष्टाध्यायी-ग्रन्थस्य समयकाल एव ख्रीष्टपूर्व-षष्ठ-पञ्चम-शतकम्, अग्निपुराणस्य च ख्रीष्टीयनवमशतकम् । अतएव कालिकपौर्वापर्येण पूर्वम् अष्टाध्यायी-ग्रन्थस्य, ततः अग्निपुराणस्य समासनियमाः समुल्लिखिताः सन्ति । इदानीं -

**अष्टाध्याय्यां समासाः**

संस्कृतव्याकरणशास्त्रेषु समासस्य **चतुर्विधत्वं** सर्वत्रैव स्वीकृतम् । तद्यथा – **अव्ययीभावः**, **तत्पुरुषः**, **बहुव्रीहिः**, **द्वन्द्वः** चेति ।

क) **अव्ययीभाव-समासः** – अव्ययीभावसमासे[13] पूर्वपदार्थस्य प्राधान्यं भवति । तदुच्यते **पूर्वपदार्थप्रधानोऽव्ययीभावः** इति । यथा – हरौ अधिहरि, रूपस्य योग्यम् अनुरूपम् इत्यादि । अव्ययीभावसमासनिष्पन्नः शब्दः नपुंसकलिङ्गं स्यात् । सूत्रं तु **अव्ययीभावश्च** [14] इति ।

अव्ययीभावसमासविधायकम् अपरं सूत्रम् – **अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्था-भावात्ययासम्प्रतिशब्द-प्रादुर्भाव-पश्चाद्यथानुपूर्व-योगपद्य-सादृश्य-सम्पत्ति-साकल्यान्त-वचनेषु**[15] इति । आशयो यत् – **विभक्त्यर्थादिषु वर्तमानं विभिन्नम् अव्ययं सुवन्तेन सह समस्यते, स च समासः अव्ययीभावसंज्ञः स्यात्** [16] इति । यथा (कतिपय) –

**विभक्तिः** – हरौ अधिहरि, स्त्रिषु अधिस्त्रि इति । **सामीप्यम्** – कण्ठस्य समीपम् उपकण्ठम्, अक्ष्णोः समीपम् – अन्वक्षम् इत्यादि । **समृद्धिः-** मद्राणां (कल्याणानां) समृद्धिः – समुद्रम् इत्यादि । **पश्चात्**– रथस्य पश्चात् – अनुरथम् । **यौगपद्यम्** – चक्रेण युगपत् – सचक्रम् ।

असादृश्ये सति यथा-शब्देन सह अव्ययीभावो न स्यात् । सूत्रं **- यथाऽसादृश्ये** [17] इति । उदाहरणं – यथावृद्धम्, यथाशक्ति इति । सादृश्यार्थे समासो न भवति – यथा हरिः तथा हरः ।

अव्ययीभावविधायकानि कानिचित् सूत्राणि –

**यावदवधारणे** (पा. 2.1.8) – अवधारणार्थे यावच्छब्देन सह अव्ययीभावो भवति । यथा – यावन्तो बृद्धाः तावतः यूनः आमन्त्रयस्व – यावद्वृद्धं यूनः आमन्त्रयस्व इति ।

**सुप् प्रतिना मात्रार्थे** (पा. 2.1.9) – मात्रा – लेशार्थे प्रति-अव्ययेन सह सुवन्तानाम् अव्ययीभावो भवति । यथा – शाकस्य लेशः – शाकप्रति, सुखस्य लेशः – सुखप्रति ।

**अनुर्यत्समया** (पा. 2.1.15) – सामीप्यार्थे तद्वाचकेन सह अनु-शब्दस्य अव्ययीभावसमासो भवति । यथा – वनम् अनु – अनुवनम् (वनसमीपम्) ।

---

[9] पा. – 2.1.1

[10] पा. – 1.2.43

[11] पा. – 2.2.30

[12] पा. – 1.2.44

[13] अव्ययीभावः (पा. – 2.1.5)

[14] पा. – 2.4.18

[15] पा. – 2.1.6

[16] दी. (पा. 2.1.6)

[17] पा. – 2.1.7

**पारे मध्या षष्ठ्या वा** (पा. 2.1.18) – षष्ठ्यन्तपदेन सह पार-मध्य-शब्दयोः अव्ययीभावो भवति, समस्यमाने पदे ए-कारश्च भवति । विकल्पेन षष्ठी-तत्पुरुषोऽपि भवति । यथा – गङ्गायाः पारात् – पारेगङ्गात्, गङ्गापारात् वा, गङ्गायाः मध्यात् – मध्येगङ्गात्, गङ्गामध्यात् वा ।

**संख्या वंश्येन** (पा. 2.1.19) – वंशो द्विधा – विद्यया, जन्मना च । तत्र भवो वंश्यः, तद्वाचिना सह संख्या वा समस्यते । यथा – द्वौ मुनी वंश्यौ – द्विमुनी, त्रयः मुनयः वंश्याः – त्रिमुनि इत्यादि ।

**नदीभिश्च** (पा. 2.1.10) – संख्यावाचकस्य समाहारार्थे नदीनाम्ना समस्यते । यथा – सुतानां गङ्गानां समाहारः – सप्तगङ्गम् ।

इदानीं,

ख) **तत्पुरुष-समासः** – तस्य पुरुषः तत्पुरुषः इति । एतत्तु व्यधिकरणसमासः । तस्य लक्षणं तु – **उत्तरपदार्थप्रधानस्तत्पुरुषः** इति । तत्पुरुषे पूर्वपदं द्वितीयायाः सप्तमीविभक्तिं यावत् कञ्चित् विभक्त्यन्तं भवति, उत्तरपदं तु सर्वदा प्रथमान्तम् । यथा –

कृष्णं श्रितः – कृष्णाश्रितः (**द्वितीयातत्पुरुषः**), शङ्कुलया खण्डः – शङ्कुलाखण्डः (**तृतीयातत्पुरुषः**), यूपाय दारु – यूपदारु (**चतुर्थीतत्पुरुषः**), वृकात् भयम् – वृकभयम् (**पञ्चमीतत्पुरुषः**), राज्ञः पुरुषः – राजपुरुषः (**षष्ठीतत्पुरुषः**), आतपे शुष्कः – आतपशुष्कः (**सप्तमीतत्पुरुषः**) इति । अतएव कथितुं शक्यते यत् – तत्पुरुष-समासः सप्तधा विभज्यते । तेषां लक्षणानि यथा -

अ) **द्वितीयातत्पुरुषः** – द्वितीयातत्पुरुषस्य लक्षणं तु **द्वितीया श्रितातीत-पतित-गतात्यस्त-प्राप्तापन्नैः**[18] इति । आशयो यत् द्वितीययान्तं श्रितादिभिः सुवन्तैः सह समस्यते स तत्पुरुषः इति । यथा – ग्रामं गतः – ग्रामगतः, सुखं प्राप्तः – सुखप्राप्तः, दुःखेन आपन्नः – दुखापन्नः इत्यादि ।

आ) **तृतीयातत्पुरुषः** – तृतीयातत्पुरुषस्य लक्षणं तु **तृतीया तत्कृतार्थेन गुणवचनेन** [19] इति । आशयो यत् तृतीयान्तार्थकृतो यो गुणः तद्वचनेन अर्थशब्देन च सह तृतीयान्तं समस्यते इति । यथा – शङ्कुलया खण्डः – शङ्कुलाखण्डः, धान्येन अर्थः – धान्यार्थः इत्यादि ।

इ) **चतुर्थीतत्पुरुषः** – चतुर्थीतत्पुरुषस्य लक्षणं तु **चतुर्थी तदर्थार्थ-वलि-हित-सुख-रक्षितैः**[20] इति । आशयो यत् तस्मै इदं तदर्थम् । तदर्थेन इह प्रकृतिविकृतिभाव एव गृह्यते वलिहितग्रहणात् ज्ञापकात् । प्रकृतिविकृतिभावे चतुर्थ्यन्ताय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा समस्यते । यथा - यूपाय दारु – यूपदारु, कुण्डलाय हिरण्यम् – कुण्डलहिरण्यम्, गवे रक्षितम् – गोरक्षितम्, गवे सुखम् – गोसुखम् इत्यादि ।

ई) **पञ्चमीतत्पुरुषः** – पञ्चमीतत्पुरुषस्य लक्षणं तु **पञ्चमी भयेन** [21] इति, भय-भीत-भीति-भीभिरिति वाच्यम् [22] इति च । आशयो यत् पञ्चम्यन्तं सुवन्तं भय-भीत-भीति-भी-शब्दैः सह समस्यते । यथा – चौरात् भयम् चोरभयम्, वृकात् भीतः – वृकभीतः इत्यादि ।

उ) **षष्ठीतत्पुरुषः** – षष्ठीतत्पुरुषस्य लक्षणं तु **षष्ठी** [23] इति । षष्ठ्यन्तेन पदेन सह सुवन्तपदस्य षष्ठीतत्पुरुषो भवति । यथा - राज्ञः पुरुषः – राजपुरुषः, ब्राह्मणस्य याजकः - ब्राह्मणयाजकः इत्यादि ।

ऊ) **सप्तमीतत्पुरुषः** – सप्तमीतत्पुरुषस्य लक्षणं तु **सप्तमी शौण्डैः**[24] इति । आशयो यत् सप्तम्यन्तं सुवन्तं शौण्डादिभिः सह समस्यते । यथा – दाने शौण्डः – दानशौण्डः, रणे पण्डितः – रणपण्डितः, वचने पटुः – वचनपटुः इत्यादि ।

पाणिनिव्याकरणे **एकदेशी-नञ्-उपपद-कु-गति-प्रादि-कर्मधारय-द्विगु** एव तत्पुरुष-समासस्य भेदाः । एतैः अष्टभिः विभागैः सह पाणिनिव्याकरणानुसारेण तत्पुरुष-समासः **पञ्चदश-प्रकाराः** । तत्र –

**एकदेशी-तत्पुरुषः** – पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे (पा. 2.2.1) इति सूत्रेण एकदेशी-तत्पुरुषो विहितः । षष्ठीविभक्त्या एकवचनान्तेन अवयविना सह अवयववचनाः एकदेशवाचकानां पूर्व-अपर-अधर-उत्तर-शब्दानां एकदेशी-तत्पुरुषो विहितः । थआ – पूर्वं कायस्य – पूर्वकायः, अपरं कायस्य – अपरकायः, मध्यम् अह्नः – मध्याह्नः, सायम् अह्नः – सायाह्नः, मध्यं रात्रेः – मध्यरात्रः, पूर्वं रात्रेः – पूर्वरात्रः, अर्धं पिप्पल्याः – अर्धपिप्पली इत्यादि ।

**नञ्तत्पुरुषः** – नञ्सुपा सह समस्यते । सुवन्तेन सह नञ्-इति अव्ययपदस्य समासत्वात् तदेव नञ्तत्पुरुष इति । सूत्रं तु **नञ्** (पा. 2.2.6) इति । **नलोपो नञः** (पा. 6.3.73) इति सूत्रेण उत्तरपदे परे स्थिते सति नञ्-शब्दस्य न्-इत्यस्य लोपो भवति । यथा – न ब्राह्मणः – अब्राह्मणः, न दर्शनम् – अदर्शनम् इत्यादि । संक्षेपेण एतदेव तत्पुरुषः समासः ।

**उपपद-तत्पुरुषः** – **उपपदमतिङ्** (पा. 2.2.19) इति सूत्रेण उपपदसमासो विधीयते । आशयो यत्, उपपदं सुवन्तं समर्थेन नित्यं समस्यते । अतिङश्चायं समासः । यथा – कुम्भं करोति यः सः – कुम्भकारः, यशः प्रार्थयते यः सः – यशःप्रार्थी , सत्यं वदति यः सः – सत्यवादी इत्यादि ।

**कु-गति-प्रादि-तत्पुरुषः** – **कु-गति-प्रादयः** (पा. 2.2.18) इति सूत्रेण **कु-गति-प्रादि-तत्पुरुषः** विहितः । आशयो यत् कुशब्दः गतिशब्दाः प्रादिशब्दाश्च नित्यं समर्थेन सह समस्यते । यथा **कुतत्पुरुषस्य** उदाहरणम् – कुत्सितः जनः – कुजनः, कुत्सितः अश्वः – कदश्वः, कुत्सितः पन्था – कापथम् इत्यादि ।

**गतितत्पुरुषस्य** उदाहरणम् – प्र-परादि विंशति-संख्यकाः अव्ययाः, च्वि-डाच्-प्रत्ययान्त-शब्दाः, अलमादय अव्ययाः धातुभिः सह संयुज्यन्ते चेत् गतिसंज्ञा विधीयते । धातुभिः सह गतेः समासः गतिसमास इत्युच्यते । यथा – प्रविश्य, पराभूय, स्वीकृत्य, अलङ्कृत्य, पुरस्कृत्य इत्यादि ।

**प्रादितत्पुरुषस्य** उदाहरणम् - प्र-परादि विंशति-संख्यकैः अव्ययैः सह सुवन्तानां तत्पुरुष-समासः प्रादितत्पुरुष- नाम्ना व्यपदिश्यते । यथा – प्रगतः आचार्यः – प्राचार्यः, प्रगतः पितामहः – प्रपितामहः, सु शोभन पन्थाः – सुपन्थाः, अतिशयितः सुन्दरः – अतिसुन्दरः इत्यादि । इदानीं,

**कर्मधारय-समासः** – समास्यास्य लक्षणं तु **तत्पुरुषः समानाधिकरणः कर्मधारयः**[25] इति । पूर्वमुक्तं यत् तस्य पुरुषः तत्पुरुषः इति । एतत्तु व्यधिकरणसमासः । परन्तु कर्मधारयस्य लक्षणं तु समानाधिकरणत्वम् । भिन्नप्रवृत्ति-निमित्तयोः द्वयोः एकस्मिन् वृत्तिः समानाधिकरण्यम् इति । ज्ञायते यत् **उत्तरपदार्थप्रधानस्तत्पुरुषः** इति । कर्मधारयेऽपि परपदार्थस्य प्राधान्यत्वात् कर्मधारयोऽपि तत्पुरुषान्तर्गतम् । यथा – पूर्वं स्नातः पश्चात् अनुलिप्तः – स्नातानुलिप्तः, कृतं च तत् अकृतं च – कृताकृतम् , नीलश्चासो लोहितश्चेति – नीललोहितः, सुकेशी भार्या – सुकोशभार्या इत्यादि ।

पाणिनिव्याकरणानुसारेण कर्मधारयस्तु चतुर्धा – **उपमान-कर्मधारयः**, **उपमित-कर्मधारयः**, **रूपक-कर्मधारयः**, **मध्य(उत्तर)पदलोपी-कर्मधारयः** इति । एतेषु **उपमान- उपमित-रूपकास्तु** उपमामूलक-कर्मधारयस्य अन्तर्गताः ।

**उपमान-कर्मधारयः** – **उपमानानि सामान्यवचनैः**[26] इत्येव उपमान-कर्मधारयस्य लक्षणम् । आशयो यत् – उपमानवाचीनि सुवन्तानि सामान्यवचनैः सुवन्तैः सह समस्यते । यथा – घन इव श्यामः – घनश्यामः, शैल इव उन्नतः – शैलोन्नतः इतयादि ।

---

[18] पा. – 2.1.24

[19] पा. – 2.1.30

[20] पा. – 2.1.36

[21] पा. – 2.1.37

[22] वा. - 1275

[23] पा. – 2.2.8

[24] पा. – 2.1.40

[25] पा. – 1.2.42

[26] पा. – 2.1.55

**उपमित-कर्मधारयः** – **उपमितं व्याघ्रादिभिः सामान्याप्रयोगे** [27] इत्येव उपमित-कर्मधारयस्य लक्षणम् । आशयो यत् – विशेषण-समासेन सिद्धे विशेषस्य पूर्वनिपातार्थमिदं सूत्रम् । साधारणधर्मस्य अप्रयोगे उपमेयवाचि सुबन्त व्याघ्रादिभिः उपमानैः सह समस्यते । यथा – पुरुषः व्याघ्र इव – पुरुषव्याघ्रः, नरः सिंह इव – नरसिंहः इत्यादि ।

**रूपक-कर्मधारयः** – **रूपकमभेदे** इत्येव रूपक-कर्मधारयस्य लक्षणम् । आशयो यत् – उपमानोपमेययोः अभेदे विवक्षिते रूपकं स्यात् । यथा – मुखम् एव चन्द्रः - मुखचन्द्रः, शोक एव अग्निः – शोकाग्निः इत्यादि ।

**मध्य(उत्तर)पदलोपी-कर्मधारयः** - **शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्**[28] इत्येव मध्य(उत्तर)पदलोपी-कर्मधारयस्य लक्षणम् । शाकपार्थिवादि समासे समासघटकयोः पदयोर्मध्ये प्रथम-समासवब्धपदस्य तथा परवर्तिनः उत्तरपदस्य लोपो भवति । यथा – शाकः (शक्तिः) प्रियः यस्य स – शाकप्रियः, शाकप्रियः पार्थिवः – शाकपार्थिवः, छाया प्रधानः यस्य स – छायाप्रधानः, छायाप्रधानः तरुः – छायातरुः इत्यादि ।

संक्षेपेण एतदेव कर्मधारयः समासः । इदानीं,

**द्विगु-समासः** - **तद्धितार्थोत्तरपदसमाहारे च**,[29] **संख्यापूर्वो द्विगुः**[30] इत्येव द्विगु-समासस्य लक्षणद्वयम् । आशयो यत् तद्धितार्थविषये, उत्तरपदे च परतः, समाहारे च अभिधेये दिक्संख्ये समानाधिकरणेन सुबन्तेन समस्येते, तयोः यः संख्यापूर्वः समासः स द्विगु इति । तदुच्यते **तत्पुरुषविशेषः कर्मधारयः, तद्विशेषो द्विगुः** इति । द्विगुस्तु त्रिविधः – **तद्धितार्थ-द्विगुः, उत्तरपद-द्विगुः, समाहार-द्विगुः** इति ।

**तद्धितार्थ-द्विगुः** – पञ्चभिः गोभिः क्रीतः – पञ्चगुः, षण्णां मातॄणाम् अपत्यं पुमान् – षाण्मातुरः इति ।

**उत्तरपद-द्विगुः** – पञ्च गावः धनं यस्य सः – पञ्चगवधनः इति ।

**समाहार-द्विगुः** – त्रयाणां भुवनानां समाहारः – त्रिभुवनम् इति ।

द्विग्वर्थः समाहारः एकवचनं स्यात् । यथा – पञ्चगवम् (पञ्चानां गवां समाहारः), चतुर्युगम् (चतुर्णां युगानां समाहारः) । सुत्रम् – **द्विगुरेकवचनम्** [31] इति । समाहार-द्विगुः नपुंसकलिङ्गं भवति । यथा त्रिभुवनम्, त्रिमुनि (त्रयाणां मुनीनां समाहारः), चतुर्युगम् (चतुर्णां युगानां समाहारः) इति । सूत्रम् – **स नपुंसकम्** [32] इति ।

इदानीं –

ग) **बहुव्रीहि-समासः** - **शेषो बहुव्रीहिः** [33] इति सूत्रेण बहुव्रीहि-समासो विहितः । अत्र शेषो नाम प्रथमान्तमिति । **द्वितीया श्रितातीत-पतित-गतात्यस्त-प्राप्तापन्नैः** (पा. 2.1.24) इति सूत्रेण द्वितीया-तत्पुरुषो विहितः । **तृतीया तत्कृतार्थेन गुणवचनेन** (पा. 2.1.30) इति सूत्रेण तृतीया-तत्पुरुषो विहितः । **चतुर्थी तदर्थार्थ-वलि-हित-सुख-रक्षितैः** (पा. 2.1.36) इति सूत्रेण चतुर्थी-तत्पुरुषो विहितः । **पञ्चमी भयेन** (पा. 2.1.37) इति सूत्रेण पञ्चमी-तत्पुरुषो विहितः । **षष्ठी** (पा. 2.2.8) इति सूत्रेण षष्ठी-तत्पुरुषो विहितः । **सप्तमी शौण्डैः** (पा. 2.1.40) इति सूत्रेण सप्तमी-तत्पुरुषो विहितः । अत एव प्रथमातत्पुरुषस्य विधानार्थं **शेषो बहुव्रीहिः** (पा. 2.2.23) इति सूत्रं विचरितं तत्रभवता ग्रन्थकारेण महर्षि-पाणिनिना ।

**अन्यपदार्थप्रधानो बहुव्रीहिः** इति बहुव्रीहि-समासस्य नियमः । अर्थस्तु स्पष्ट एव । **अनेकमन्यपदार्थे** [34] इति सूत्रेणापि बहुव्रीहि-समासस्य स्वरूपमवगम्यते । सूत्रस्यास्याशयो यत् अनेकं प्रथमान्तम् अन्यस्य पदस्य अर्थे वर्तमानं वा समस्यते स बहुव्रीहिः इति । यथा – प्राप्तम् उदकं यस्य सः – प्राप्तोदकः ग्रामः, कृतं कर्म येन सः – कृतकर्मा पुरुषः, पीतम् अम्बरं यस्य सः – पीताम्बरो हरिः इत्यादि । समासोऽयं द्विधा विभज्यते – **समानाधिकरण-बहुव्रीहिः, व्यधिकरण-बहुव्रीहिः** इति ।

**समानाधिकरण-बहुव्रीहिः** – विशेष्य-विशेषणे पदे यदा एकविभक्त्यन्ते भवतः तदा समानाधिकरण-बहुव्रीहिः भवति । यथा – महत् बलं यस्य यः – महावलः, कृतं कर्म येन सः – कृतकर्मा इत्यादि ।

**व्यधिकरण-बहुव्रीहिः** – विशेष्य-विशेषणे यदा विविधविभक्त्यन्ते भवतः तदा व्यधिकरण-बहुव्रीहिः भवति । यथा – वीणा पाणौ यस्य सः – वीणापाणिः, क्षणे जन्म यस्य सः – क्षणजन्मा इत्यादि ।

एतौ द्वौ पुनः **द्विधा** विभज्यते **तद्गुणसंविज्ञान-अतद्गुणसंविज्ञान**-भेदेन । बहुव्रीहिसमासे यदा समस्यमान-पदोऽपि क्रियया संयुज्यते तदा **तद्गुणसंविज्ञानं** नाम बहुव्रीहिः भवति । यथा – **लम्बकर्णम् आनय** । आनय-इति क्रियया सह लम्बकर्णयुक्तस्य बालकस्य, कर्णस्य च अन्वयोऽस्ति । यत्र समस्यमानपदः क्रियया न संयुज्यते तदा **अतद्गुणसंविज्ञानं** भवति । यथा – **दृष्टसमुद्रम् आनय** । आनय-इति क्रियया सह दृष्टसमुद्रस्य बालकस्य अन्वयोऽस्ति, परन्तु समुद्रस्य अन्वयो नास्ति ।

बहुव्रीहि-समासस्य अपरौ **द्वौ भेदौ** यथा - **व्यतिहार-बहुव्रीहिः, तुल्ययोगे बहुव्रीहिः** चेति ।

**व्यतिहार-बहुव्रीहिः** – **तत्र तेनेदमिति सरूपे** [35] इति सुत्रेण व्यतिहार-बहुव्रीहि अवगम्यते । सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च ग्रहणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे द्योत्ये स व्यतिहार-बहुव्रीहिः भवति । **इच् कर्मव्यतिहारे** [36] इति सूत्रेण व्यतिहार-बहुव्रीहौ नित्यमिच् भवति, पूर्वपदस्य अन्त्यस्वरो दीर्घो भवति । यथा – केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् – केशाकेशि । दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तम् – दण्डादण्डि इत्यादि ।

**तुल्ययोगे बहुव्रीहिः** – **तेन तहेति तुल्ययोगे** [37] इति सुत्रेण तुल्ययोगे बहुव्रीहिः अवगम्यते । आशयो यत् तुल्ययोगे वर्तमानं सह इत्येतत् तृतीयान्तेन बहुव्रीहि-समासो भवति । एतत्तु तुल्ययोगे बहुव्रीहिः इति कथितम् । तुल्ययोगो नाम **युगपत्कालिकक्रियायोग** [38] इति । यथा - अनुजेन सह भ्रमति – सहानुजो भ्रमति इति । **वोपसर्जनस्य** इति सूत्रेण [39] सह-शब्दस्य स्थाने विकल्पे स भवति । यथा – अनुजेन सह भ्रमति – सहानुजः सानुजो वा भ्रमति । पुत्रेण सह गच्छति – सहपुत्रः सपुत्रो वा गच्छति इत्यादि ।

---

[27] पा. – 2.1.56

[28] वा. - 1310

[29] पा. – 2.1.51

[30] पा. – 2.1.52

[31] पा. – 2.4.1

[32] पा. – 2.4.17

[33] पा. – 2.2.23

[34] पा. – 2.2.24

[35] पा. – 2.2.27

[36] पा. – 5.4.127

एतदेव संक्षेपेण बहुव्रीहि-समासः। बहुव्रीहि-समास-विधायकानि बहूनि सूत्राणि तत्र सन्ति। परन्तु ग्रन्थभयात् तेषामुल्लेखनं निष्प्रयोजनमिति। इदानीं –

घ) **द्वन्द्वसमासः -** उभयपदार्थप्रधानो द्वन्द्वः इत्येव द्वन्द्वसमासस्य प्राथमिकलक्षणम्। यत्रोभयपदस्य अर्थः प्रधानरूपेण प्रतीयते तत्र द्वन्द्वसमासो भवति। **चार्थे द्वन्द्वः** इति सूत्रेण,[40] **अनेकमन्यपदार्थे** इति सूत्रेण[41] च द्वन्द्वसमासस्य स्वरूपं प्रतिपादितम्। यथा – रामश्च लक्ष्मणश्च – रामलक्ष्मणौ इत्यादि।

**चार्थे द्वन्द्वः** – अनेकं सुवन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्वः इति। सूत्रस्थितस्य च-इति शब्दस्य चत्वारोऽर्थाः सन्ति – **समुच्चय-अन्वाचय-इतरेतर-समाहाराः** चेति।

**समुच्चयः** – एकस्मिन् क्रियापदे आवृत्ते एकस्य असमस्यमानपदस्य प्रथममन्वयः, तदनन्तरमन्यस्यान्वयो यत्र, तत्र समुच्चयः इति। यथा – ईश्वरं गुरुं च भजस्व।

**अन्वाचयः** – यत्रान्यतरस्य पदस्यैकस्मिन् क्रियापदे आनुषङ्गिकत्वेन परार्थप्रवृत्तिविषयत्वेनान्वयः, इतरस्य तु पदस्यान्यस्मिन् क्रियापदे उद्देश्यत्वेनान्वयश्च तत्रान्वाचयः इति। यथा – भिक्षामट गां चानय इति।

**इतरेतरः** – परस्परापेक्षितानां समुदितानामेकस्मिन् क्रियापदेऽन्वयो यत्र, तत्र इतरेतरयोगः। यथा – धवश्च खदिरश्च धवखदिरौ इति। अत्र परस्परसाहित्यसूचनाय चकारद्वयप्रयोगः इति।

**समाहारः** – समूहः समाहारः इति। परस्परसाहित्यमित्यर्थः। यथा – संज्ञापरिभाषयोः समूहः संज्ञापरिभाषमिति। पाणी च पादौ च – पाणिपादम्। समाहारद्वन्द्वविषयकानि बहूनि सूत्राणि तत्र सन्ति, परन्तु ग्रन्थभयादत्र नोल्लिख्यन्ते।

इदानीं **नित्य-अलुक्-सहसुपा**-समासाः –
**नित्यसमासः** – नित्यः सनातनः, अनित्यः कदाचित्कः। यः समासः सर्वै भवति स एव नित्यः। यथा – कृष्णसर्पः, ग्रामान्तरम् इत्यादि। यदा समासो न भवति, कदाचिद्वा भवति, कदाचिच्च न भवति स अनित्यः समासः। यथा – कृष्णश्रितः कृष्णंश्रितो वा, रामहतो रामेण हतो वा इत्यादि। नित्यसमासस्तु द्विविधः – **अविग्रहः, अस्वपदविग्रहः** चेति।

**अविग्रह-नित्यसमासः** – कृष्णसर्पः (विषयुक्तः सर्पः)। यदि कृष्णः सर्पः एवमुच्यते तर्हि कृष्णवर्णः सर्पः इत्यर्थो भवति, न तु विषयुक्तः सर्पः। अत एवात्र अविग्रहनित्यसमासः।

**अस्वपदविग्रह-नित्यसमासः** – अन्यः देशः – देशान्तरम्, ज्ञानाय इदम् – ज्ञानार्थम्, चित् एव – चिन्मात्रम् इत्यादि। अत्र समासघटितैः पदैः व्यासवाक्यं न भवति। अत एवात्र अस्वपदविग्रह-नित्यसमासः इति।
**अलुक्समासः** – अविद्यमानो लुक् लोपः विभक्तेर्यस्मिन् समासे स अलुक् समासः कथ्यते। सूत्रम् – **अलुगुत्तरपदे**[42] इति। यथा – स्तोकात् मुक्तः – स्तोकान्मुक्तः, विप्रकृष्टात् आगतः – विप्रकृष्टादागतः, वने किंशुका इव वनेकिंशुकाः इत्यादि।

**सहसुपा सुप्सुपा वा समासः** – सुवन्तपदेन सह सुवन्तपदस्य समास सहसुपा सुप्सुपा वा समासः। यस्य समासस्य विशेषसंज्ञा न कृता, स सामान्येन सहसुपेति समासः। यथा – पूर्वं भूतः - भूतपूर्वः, अवश्यं कर्तव्यम् - अवश्यकर्तव्यः, दृढं बद्धः - दृढबद्धः, न एकः - नैकः, न अतिदीर्घः - नातिदीर्घः, न अतिदूरम् - नातिदूरम्, यथा प्राप्ता - यथाप्राप्ता, विना कृता - विनाकृता, पुनः जन्म - पुनर्जन्म इत्यादि।

एतावदेव पाणिनिव्याकरणे समासविमर्शः। इदानीम् अग्निपुराणे समासविमर्शः -

## अग्निपुराणे समासः

अग्निपुराणस्य पञ्चपञ्चाशदधिक-त्रिशततमेऽध्याये (355) समासो विहितः। *नामकुर्यान्नाटकस्य गर्भितार्थप्रकाशनम्* इति नियमेन अग्निपुराणस्य अध्यायस्यास्य नाम एव ***समासः*** इति।
अग्निपुराणानुसारेण समासस्तु षड्विधः। तस्य समासस्य पुनः अष्टविंशतिधा भागो विद्यते। तदर्थं अध्यायस्यास्य प्रारम्भे स्कन्ध उवाच[43] – ***षोढा समासं वक्ष्यामि अष्टाविंशतिधा पुनः*** इति।
पुराणेऽस्मिन् समासः **प्राथम्येन द्विधा** विभज्यते। **प्रथमतया – नित्य-अनित्य-लुक्-अलोप-भेदेन**, **द्वितीयतया – तत्पुरुषादि भेदेन** च। **प्राधान्येन** च **चतुर्धा** विभज्यते – **उत्तरपदार्थमुख्यः, द्वन्द्वः, अव्ययीभावः बहुव्रीहिः** चेति।
**प्रथमतया – नित्य-अनित्य-लुक्-अलोप-भेदेन -** पुराणानुसारेणानेन **नित्यादि समासो द्विधा** विभज्यते। तद्यथा – क) **नित्यानित्य-समासः (नित्यसमासः, अनित्यसमासः)** ख) **लुगलोप-समासः (लुक्-समासः, अलोप-समासः)** चेति। तदुच्यते पुराणेऽस्मिन् – ***नित्यानित्यविभागेन लुगलोपेन च द्विधा***[44] इति।
**द्वितीयतया – तत्पुरुषादि भेदेन -** पुराणानुसारेणानेन **तत्पुरुषादि षड्विधः समास** एव – ग) **तत्पुरुष-समासः** (355.3ख) घ) **कर्मधारय-समासः** (355.8क) ङ) **बहुव्रीहि-समासः** (355.11ख) च) **द्विगु-समासः** (355.15क) छ) **द्वन्द्व-समासः** (355.16क) ज) **अव्ययीभाव-समासः** (355.17क) चेति। एतेषां षड्विधानां समासानाम् अवान्तरविभागाः सन्तीति कृत्वा समासस्तु **अष्टाविंशतिधा** भवति।

---

[37] पा. – 2.2.28
[38] बाल. (पा. 2.2.28)
[39] पा. – 6.3.82
[40] पा. – 2.2.29
[41] पा. – 2.2.24
[42] पा. - 6.3.1
[43] अग्नि. – 355.1क
[44] अग्नि. – 355.1ख

**अवान्तरविभागाः** यथा – **तत्पुरुषस्य अष्ट-विभागाः** (355.3 ख-7), **कर्मधारयस्य सप्त** (355.8क-11क), **बहुव्रीहेः सप्त** (355.11ख-15), **द्विगोः द्वयः** (355.15), **द्वन्द्वस्य द्वयः** (355.16), **अव्ययीभावस्य** च **द्वयः** (355.17क-18क) (8+7+7+2+2+2 = 28) इति।

एतेषु समासेसु **तत्पुरुष-द्वन्द्व-अव्ययीभाव-बहुव्रीहिणां** लक्षणं पुराणेऽस्मिन् प्रदत्तम्। तेषां लक्षणं यथा **- तत्पुरुषः** – उत्तरपदस्य प्राधान्यम्। **द्वन्द्वः** – उभयपदस्य प्राधान्यम्। **अव्ययीभावः** – पूर्वपदस्य प्राधान्यम्। **बहुव्रीहिः** – अन्यपदस्य तथा बाह्यपदस्य प्राधान्यम्। तदुच्यते –

***... प्राधान्येन चतुर्विधः। उत्तरपदार्थमुख्यो द्वन्द्वश्चोभयमुख्यकः।***
***पूर्वार्थेशोऽव्ययीभावो बहुव्रीहिश्च बाह्यतः॥*** [45] इति।

इतरेषां केवलम् उदाहरणानि सन्ति। पूर्वं पाणिनिव्याकरणे समासस्यालोचनाप्रसङ्गे तेषां लक्षणमुल्लिखितम्। अतएवात्र कथनेनालम् इति।

वस्तुतः पुराणेऽस्मिन् नित्यानित्यसमासयोः लुगलोपसमासयोश्च उल्लेखः पूर्वं कृतम् (355.1ख-3क), तदनन्तरं तत्पुरुषादि षण्णां समासानामुल्लेखनं कृतं (355.3ख-18) तत्रभवता ग्रन्थकारेण व्यासदेवेन। अग्निपुराणगताः समासाः यथा –

क) **नित्यानित्य-समासः** – अ) **नित्य-समासः** – कुम्भकारः, हेमकारः इति।
आ) **अनित्य-समासः** – राज्ञः पुमान् राजपुमान् इति।

ख) **लुगलोप-समासः** – अ) **लुक्-समासः** – कष्टश्रितः (कष्टं श्रितः) इति।
आ) **अलुक्-समासः** – कण्ठे कालः इति।

उच्यते - ***... । नित्यानित्यविभागेन लुगलोपेन च द्विधा॥***
***कुम्भकारश्च नित्यः स्याद्धेमकारादिकस्तथा। राज्ञः पुमान् राजपुमाननित्योऽयं समासकः॥***
***कष्टश्रितो लुक्समासः कण्ठेकालादिकस्त्वलुक्॥*** [46] इति।

ग) **तत्पुरुष-समासः** – विभक्तिस्तु सप्तधा इति सर्वैरेव ज्ञायते। तद्यथा – **प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी** चेति। एताभिः सप्तभिः विभक्तीभिः सह **तत्पुरुष-समासः सप्तधा** विभज्यते। तद्यथा – **प्रथमा-तत्पुरुषः, द्वितीया-तत्पुरुषः, तृतीया-तत्पुरुषः, चतुर्थी-तत्पुरुषः, पञ्चमी-तत्पुरुषः, षष्ठी-तत्पुरुषः, सप्तमी-तत्पुरुषः** इति। अपि च, **नञ्-तत्पुरुषं** गृहीत्वा तत्पुरुषं खलु अष्टधा विभज्यते।

अ) **प्रथमा-तत्पुरुषः** – पूर्वकायः (पूर्वं कायस्य), अपरकायः (कायस्य अपरम्), अधरकायः (अधरं कायस्य), उत्तरकायः (उत्तरं कायस्य), अर्धकणा (कणायाः अर्धम्), भिक्षातूर्यम् तूर्यभिक्षा (तूर्यं भिक्षायाः) इति। उच्यते –

***स्यादष्टधा तत्पुरुषः प्रथमाद्यसुपा सह॥***
***प्रथमातत्पुरुषोऽयं पूर्वं कायस्य विग्रहे। पूर्वकायोऽपरकायो ह्यधरोत्तरकायकः॥***
***अर्धं कणाया अर्धकणा भिक्षातूर्य्यमथेदृशम्।*** [47] इति।

आ) **द्वितीया-तत्पुरुषः** – आपन्नजीविकः (आपन्नो जीविकाम्), अधराश्रितः (अधरम् आश्रितः), वर्षभोग्यः (वर्षं भोग्यः) इति। उच्यते – **आपन्नजीविकस्तद्वद् द्वितीया चाधराश्रितः॥ वर्षं भोग्यो वर्षभोग्यो...** [48] इति।

इ) **तृतीया-तत्पुरुषः** – धान्यार्थः (धान्येन अर्थः) इति। ***धान्यार्थश्च तृतीयया*** [49] इत्युक्तम्

ई) **चतुर्थी-तत्पुरुषः** – विष्णुबलिः (विष्णवे बलिः) इति। ***चतुर्थी स्याद्विष्णुबलि***... [50] इति।

उ) **पञ्चमी-तत्पुरुषः** – वृकभीतिश्च पञ्चमी (वृकाद् भीतिः) इति। ***... वृकभीतिश्च पञ्चमी*** [51] इति।

ऊ) **षष्ठी-तत्पुरुषः** – राज्ञः पुमान् राजपुमान्, वृक्षफलं (वृक्षस्य फलम्) इति। उच्यते - ***राज्ञः पुमान् राजपुमान् षष्ठी वृक्षफलं तथा*** [52] इति।

ऋ) **सप्तमी-तत्पुरुषः – अक्षशौण्डः** इति। उच्यते - ***सप्तमी चाक्षशौण्ड...*** [53] इति।

ऌ) **नञ्तत्पुरुषः – अहितः** इति। **न हितः – अहितः** इति। उच्यते - ***... ऽयमहितो नङ्समासकः*** [54] इति।

घ) **कर्मधारय-समासः** – अग्निपुराणानुसारेण **कर्मधारय-समासः सप्तधा** विभज्यते। यथा – **विशेषणपूर्वपद-कर्मधारयः, विशेष्योत्तर-विशेषणपद-कर्मधारयः, विशेषणोभयपद-कर्मधारयः, उपमानपूर्वपद-कर्मधारयः, उपमानोत्तरपद-कर्मधारयः, सम्भावनापूर्वपद-कर्मधारयः, अवधारणपूर्वपद-कर्मधारयः** चेति।

अ) **विशेषणपूर्वपद-कर्मधारयः –** यत्र पूर्वपदं विशेषणं, उत्तरपदं च विशेष्यपदं, तत्र विशेषणपूर्वपद-कर्मधारयो भवति। यथा – नीलोत्पलम् (नीलम् उत्पलम्)।

आ) **विशेष्योत्तर-विशेषणपद-कर्मधारयः –** यत्र पूर्वपदं विशेष्यं, उत्तरपदं च विशेषणपदं, तत्र विशेष्योत्तर-विशेषणपद-कर्मधारयो भवति। यथा – वैयाकरणखसूचिः।

इ) **विशेषणोभयपद-कर्मधारयः –** यत्रोभयपदं विशेषणं भवति, तत्र विशेषणोभयपद-कर्मधारयो भवति। यथा – शीतोष्णम्।

ई) **उपमानपूर्वपद-कर्मधारयः** – उपमानपदं यथा पूर्वपदं भवति, तदा उपमानपूर्वपद-कर्मधारयो भवति। यथा – शङ्खपाण्डुरः।

उ) **उपमानोत्तरपद-कर्मधारयः** – उपमानपदं यथा उत्तरपदं भवति, तदा उपमानोत्तरपद-कर्मधारयो भवति। यथा – पुरुषव्याघ्रः।

च) **सम्भावनापूर्वपद-कर्मधायय:** – पूर्वपदं यदि सम्भावनात्मकं भवति, तदा सम्भावनापूर्वपद-कर्मधायय: भवति। यथा – गुणवृद्धिः। गुणशब्दहेतुः वृद्धेः सम्भावना आयाति।

---

[45] अग्नि. – 355.18
[46] अग्नि. – 355.1ख-3क
[47] अग्नि. – 355.3ख-5क
[48] अग्नि. – 355.5ख-6क
[49] अग्नि. – 355.6क
[50] अग्नि. – 355.6ख
[51] अग्नि. – 355.6ख
[52] अग्नि. – 355.7क
[53] अग्नि. – 355.7ख
[54] अग्नि. – 355.7ख

छ) **अवधारणपूर्वपद-कर्मधायरः** – पूर्वपदे अवधारणस्य तथा निश्चयात्मकस्य शब्दस्य यदि प्रयोगो भवति, तर्हि अवधारणपूर्वपद-कर्मधारयो भवति। यथा – सुहृदेव सुबन्धुकः। तदुच्यते –

***कर्मधारयः सप्तधा नीलोत्पलमुखः स्मृतः। विशेषणपूर्वपदो विशेष्योत्तरस्तथा॥***
***वैयाकरणखसूचिः शीतोष्णों द्विपदं शुभम्। उपमानपूर्वपदः शङ्खपाण्डूर इत्यपि॥***
***उपमानोत्तरपदः पुरुषव्याघ्र इत्यपि। सम्भावनापूर्वपदो गुणवृद्धिरितीदृशम्॥***
***गुण इति वृद्धिर्वाच्या सुहृदेव सुबन्धुकः। अवधारणपूर्वपदो...॥*** [55] इति।

ङ) **<u>बहुव्रीहि-समासः</u>** – अग्निपुराणानुसारेण **ब्रहुव्रीहिसमासोऽपि सप्तधा** विभज्यते। यथा – **द्विपद- बहुव्रीहिः, बहुपद-बहुव्रीहिः, संख्योत्तरपद-बहुव्रीहिः, संख्योभयपद-बहुव्रीहिः, सहपूर्वपद-बहुव्रीहिः, व्यतिहारलक्षणार्थ-बहुव्रीहिः, दिग्लक्षणार्थ-बहुव्रीहिः** चेति।

अ) **द्विपद- बहुव्रीहिः** – नाम्ना परिचीयतेऽत्र। अत्र द्वयोः पदयोः समासो भवति। यथा – आरूढभवनो नरः (आरूढं भवनं येन सः) इति। पाणिनिसूत्रम् [56] – **अनेकमन्यपदार्थे** इति।

आ) **बहुपद-बहुव्रीहिः** – नाम्ना परिचीयतेऽत्र। अत्र बहूषु पदेषु समासो भवति। यथा – अयम् अर्चिताशेषपूर्वः (अर्चिता अशेषाः पूर्वा यस्य सोऽयम् अर्चिताशेषपूर्वः)। पाणिनिसूत्रम्[57] – **अनेकमन्यपदार्थे** इति।

इ) **संख्योत्तरपद-बहुव्रीहिः** – अत्रोत्तरपदे संख्या भवति। यथा – एते विप्रा उपदशाः। दश-शब्द उत्तरपदेऽस्ति। उपदशाः – दशानां समीपे ये ते (नव एकादश वा) इति। पाणिनिसूत्रम् [58] – **संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये** इति।

ई) **संख्योभयपद-बहुव्रीहिः** – अत्रोभयपदे संख्या भवति। यथा – द्वित्रा (द्वौ वा त्रयो वा), द्व्येकत्रयः (द्वौ वा एक वा त्रयो वा)। पाणिनिसूत्रम् [59] – **संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये** इति।

उ) **सहपूर्वपद-बहुव्रीहिः** – अत्र पूर्वपदे सहास्ति। यथा - समूलोद्धृतकः तरुः (सह मूलेन उद्धृतं कं शिखा यस्य सः)। पाणिनिव्याकरणे एतत्तु **तुल्ययोगे बहुव्रीहिः** समासः। सूत्रं[60] तु – **तेन सहेति तुल्ययोगे** इति।

ऊ) **व्यतिहारलक्षणार्थ-बहुव्रीहिः** – परस्परमध्ये एकक्रियानुष्ठिते सति द्वयोः सप्तम्यन्तयोः तृतीयान्तयोः पदयोर्मध्ये बहुव्रीहि-समासः स्यात्। यथा – केशाकेशि (केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति)। एवं नखानखि इति। पाणिनिसूत्रम् – **तत्र तेनेदमिति सरूपे** [61] इति।

ऋ) **दिग्लक्षणार्थ-बहुव्रीहिः** – अन्तरालार्थे दिग्वाचकयोः शब्दयोर्मध्ये बहुव्रीहिर्भवति। यथा – उत्तरपूर्वा (उत्तरस्याः पूर्वस्याश्च दिशोः यत् अन्तरालं सा उतरपूर्वा)। पाणिनिसूत्रम् – **दिङ्नामान्यन्तराले** [62] इति।

बहुव्रीहिसमासप्रसङ्गे पुराणेऽस्मिन् प्रतिपादितम् –

***... बहुव्रीहिश्च सप्तधा॥***
***द्विपदञ्च बहुव्रीहिरारूढभवनो नरः। अर्चिताशेषपूर्वोऽयं बह्वङ्घ्रिः परिकीर्तितः॥***
***एते विप्राश्चोपदशाः संख्योत्तरपदस्त्वयम्। संख्योभयपदो यद्वद्द्वित्रा द्व्येकत्रयो नरः॥***
***सहपूर्वोपदोऽयं स्यात् समूलोद्धृतकस्तरुः। व्यतिहारलक्षणार्थः केशाकेशि नखानखि॥***
***दिग्लक्ष्या स्याद्दक्षिणपूर्वा ...॥*** इति।

च) **<u>द्विगु-समासः</u>** – अग्निपुराणानुसारेण **द्विगु**-समासस्तु **द्विविधः** – **एकवद्भावी अनेकधा** चेति।

अ) **एकवद्भावी** – द्विश्रृङ्गः, पञ्चमूली।

आ) **अनेकधा** – उदाहरणं नास्ति। परन्तु *गीताप्रेस* इति संस्करणे सप्तर्षयः इत्येतस्योदाहरणम्।

उच्यते - ***... द्विगुराभाषितो द्विधा। एकवद्भावि द्विश्रृङ्गं पञ्चमूली त्वनेकधा॥*** [63] इति।

छ) **<u>द्वन्द्व-समासः</u>** – अग्निपुराणानुसारेण द्वन्द्व-समासोऽपि **द्विविधः** – **इतरेतर-द्वन्द्वसमासः, योगक-द्वन्द्वसमासः** तथा **समाहार-द्वन्द्वसमासः** चेति।

अ) **इतरेतर-द्वन्द्वसमासः** – एकाधिकानि सुवन्तपदानि यदि क्रियया एकया सह संयुज्यन्ते तर्हि इतरेतर-द्वन्द्वसमासो भवति। यथा – रुद्र-विष्णू।

आ) **समाहार-द्वन्द्वसमासः** – समूहः समाहारः। यथा – भेरीपटहम् (भेरी च पटहश्च, अनयोः समाहारः)।

उच्यते – ***द्वन्द्वः समासो द्विविधो हीतरेतरयोगकः। रुद्र-विष्णू समाहारो भेरीपटहमीदृशम्*** [64] इति।

ज) **<u>अव्ययीभाव-समासः</u>** – अग्निपुराणानुसारेण अव्ययीभाव-समासस्तु **द्विविधः** – **नामपूर्वपद-अव्ययीभावः, अव्ययपूर्वपद-अव्ययीभावः** च।

**अ)** **नामपूर्वपद-अव्ययीभावः** – शाकस्य मात्रा – शाकप्रति। अत्र शाकस्य – पूर्वपदम्, अव्ययपदं मात्रा – उत्तरपदम्।

---

[55] अग्नि. – 355.8-11क
[56] पा. – 2.2.24
[57] पा. – 2.2.24
[58] पा. – 2.2.25
[59] पा. – 2.2.25
[60] पा. – 2.2.28
[61] पा. – 2.2.27
[62] पा. – 2.2.26
[63] अग्नि. – 355.15
[64] अग्नि. – 355.16

**आ) अव्ययपूर्वपद-अव्ययीभावः** – कुम्भस्य समीपम् – उपकुम्भम्, रथस्य समीपम् – उपरथम्। अत्र उदाहरणद्वये उप-इति अव्ययपदं पूर्वमवस्थितम्।
उच्यते –

***द्विधाख्यातोऽव्ययीभावो नामपूर्वपदो यथा। शाकस्य मात्रा शाकप्रति यथाऽव्ययपूर्वकः॥***
***उपकुम्भञ्चोपरथ्यं...***[65] इति।

अग्निपुराणे समासवर्णनात् परमेवमुपसंह्रियते –
***... प्राधान्येन चतुर्विधः। उत्तरपदार्थमुख्यो द्वन्द्वश्चोभयमुख्यकः।***
***पूर्वार्थेशोऽव्ययीभावो बहुब्रीहिश्च बाह्यतः॥*** [66] इति।

एतावदेव अग्निपुराणे समासविमर्शः। एतावत्पर्यन्तं पाणिनि-व्याकरणस्य अग्निपुराणस्य च समासविमर्शः।

**उपसंहारः –**

सुदीर्घकालात् विदुषां मध्ये भणतिरियं सुप्रसिद्धा वाणी यत् – *काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्* इति। सत्सु अपि अन्येषु व्याकरणेषु पाणिनीयव्याकरणस्य तथा अष्टाध्यायी-ग्रन्थस्यैव कथमियती चर्चा विद्यते। कथमेतज्जातं व्याकरणं लोकप्रियम्। यद्यपि देवताप्रसादात् अन्यानि व्याकरणानि सम्प्राप्तानि सन्ति, तथापि पाणिनीयव्याकरणमिदं सम्पूर्णे प्राच्ये प्रतीच्ये च लब्धप्रतिष्ठितमिति विद्यते। माहेश्वराणि चतुर्दशपरिमितानि सूत्राणि[67] आदाय विरचितमिदं व्याकरणं प्राक्तनीं विज्ञानसरणीं प्रदर्शयति। व्याकरणगतेषु प्रताहार-सन्धि-शब्दरूप-कारकादीन् अवलम्ब्य प्रायः षन्नवत्युत्तर-नवसहस्राधिक-त्रिसहस्रपरिमितानि (3996) सूत्राणि विरचितानि सन्ति। प्रसङ्गेऽस्मिन् उच्यते (एवं श्रूयते) – ***त्रीणिसूत्र-सहस्राणि तथा नवशतानि च। षण्णवतिञ्च सूत्राणां पाणिनिः कृतवान् स्वयम्॥*** इति।

इदानीम् अस्माकमस्य गवेषणापत्रस्य नाम एव **अग्निपुराणे वर्णिताः समासाः : पाणिनीयदृष्ट्या परीक्षणम्** इति। उभयग्रन्थस्य समासविषये आलोचना उपरि यथामति कृता। पुराणस्यास्य पञ्चपञ्चाशदधिक-त्रिशततमेऽध्याये (355) **समासविषये** आलोचना अस्ति। उपर्युक्तालोचनातः एतदेवावगम्यते यत् पाणिनिव्याकरणे मूलतया समासः अव्ययीभावादिभेदेन चतुर्विधः। परन्तु अग्निपुराणे समासस्य षड्विधत्वं प्रतिपादितं तत्रभवता महर्षि-व्यासदेवेन। समासानां किमपि लक्षणं तथा सूत्रं नास्ति तत्र। षड्विधानां समासानां बहूनि उदाहरणानि पुराणेऽस्मिन् प्रदत्तानि। परन्तु अष्टाध्यायां समाससूत्रमस्ति, समासनियमोऽस्ति, सूत्रसहयोगेन उदाहरणानि अपि सन्ति। अतएव पुराणस्यास्य समासविषयकानि उदाहरणान्यालोच्य तदुदाहरणस्थाने अष्टाध्याय्याः समाससूत्राणि कानि भवन्तीति गवेषणापत्रेऽस्मिन् समुल्लिख्यन्ते अस्माभिः। अत एव मन्यते खलु, गवेषणापत्रेणानेन ख्रीष्टपूर्वकालगतेन *अष्टाध्यायी*-इति व्याकरणग्रन्थेन सह ख्रीष्टपरवर्तिकालीकस्य अग्निपुराणविलसितस्य समासविषयस्य या तुलनात्मका समीक्षा मया कृता तया खलु परवर्तिकालिनः शोधछात्राः, पाठकाश्च सविशेषमुपकृताः भवन्तीति शम्॥

**शब्दसंक्षेपः –**

**अग्नि.** – अग्निपुराणम्, **ऋक्प्रा.** – ऋक्प्रातिशाख्यम्, **दी.** – दीक्षितवचनम्, **देवी.** – देवीपुराणम्, **नि.** – निरुक्तम्, **पा.** – पाणिनिः, **पा.शि.** – पाणिनीयशिक्षा, **बाल.** – बालमनोरमा, **मनु.** – मनुसंहिता, **वा.** – वार्त्तिकम्

**ग्रन्थविवरणपञ्जी –**


*अग्निपुराण* (मूल संस्कृतका हिन्दी-अनुवाद)। गोरखपुर : गीताप्रेस, 2073 संवत्।

*अग्निपुराणम्* (हिन्दी अनुवाद सहित)। पूर्वभाग-उत्तरभागसहितम्। सम्पादकौ : तारिणीश झा, घनश्याम- त्रिपाठी। एलाहावाद : हिन्दी साहित्य सम्मेलन, प्रयाग, 2007.

*अग्निपुराणम्* (महर्षि-श्रीकृष्णद्वैपायन-वेदव्यास-विरचितम्) (वङ्गानुवादसमेतम्)। सम्पा. – पञ्चानन-तर्करत्नः। परिशोधकः – श्रीजीव-न्यायतीर्थः। कलिकाता : नवभारत पावलिशार्स, 1389 वङ्गाब्दः।

अग्निपुराणम् (हिन्दीव्याख्योपेतम्)। व्याख्याकारः : शिवप्रसाद-द्विवेदी। व्रजजीवन प्राच्यभारती ग्रन्थमाला 106. दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 2004.

*अष्टाध्यायी*। चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता। महर्षि-पाणिनिः। व्याख्याकारः - ईश्वरचन्द्रः। प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला १०३, दिल्ली : चोखम्बा संस्कृत प्रतिष्ठान, २००४.

*अष्टाध्यायीसूत्रपाठः*। संशोधनकर्ता – सि. शङ्करराम शर्मा। श्रीबालमनोरमा सीरीज् नं 2, द्वितीय-संस्करणम्, मद्रास : मैलापुर, 1937.

*अष्टाध्यायी* (सूत्राणां पदच्छेद-अनुवाद-उदाहरणसूची-सूत्रसूची-गणपाठ-सहितम्)। सम्पा. – तपनशङ्कर-भट्टाचार्यः। कोलकाता : संस्कृत बुक डिपो, प्रथमसंस्करणम्, 2004.

*देववाणीतत्त्वबोधिनी* (संस्कृत-व्याकरणम्)। श्रीवरदाराजाचार्यकृतलघुकौमुदीस्थसंज्ञासन्धिसमासकृदन्त-तद्धितस्त्रीप्रत्ययतिङन्तण्यन्तादिप्रकरणैः सहितं तथा श्रीभट्टोजिदीक्षितकृत-सिद्धान्तकौमुदीस्थकारकप्रकरणं-सरलहिन्दीव्याख्यासहितम्। व्याख्याकारः : अविनाशः कृष्णः। दिल्ली : मोतीलाल बनारसीदास, 2023.

*पाणिनिर अष्टाध्यायी* (वङ्गभाषया)। *प्रभा*-टीका द्वारा सनाथीकृत। सम्पा. – देवेन्द्रकुमार-विद्यारत्न। कोलकाता : वलराम प्रकाशनी, पुनर्मुद्रितसंस्करण, 2003.

*पाणिनीय शब्दशास्त्र* (वङ्गभाषया)। भट्टोजिदीक्षित-विरचित सिद्धान्तकैमुदी अनुसारे विन्यस्त अष्टाध्यायी-सूत्रसमूहेर आलोचनात्मक संस्कृत व्याकरण। सत्यनारायण चक्रवर्ती। कोलकाता : संस्कृत पुस्तक भाण्डार, पुनर्मुद्रितसंस्करण, 2013. प्रथमप्रकाश 2003.

*वैयाकरणसिद्धान्तकौमुदी*। सम्पा. – रामचन्द्र झा। व्याख्याकारः – सत्यनारायण शास्त्री खण्डुडी। *इन्दुमती* संस्कृत-हिन्दीव्याख्या-विविधपरिशिष्ट दिप्पणी (नोटस्) सहिता (ण्यन्तादि-समाप्त्यन्तो भागः)। कृष्णदास संस्कृत सीरीज् 13, प्रथमभागतः चतुर्थभागपर्यन्तम्। वाराणसी : कृष्णदास अकादेमी, प्रथम-द्वितीय-भागौ, 2001; तृतीय-चतुर्थ-भागौ, 2002.

*वैयाकरणसिद्धान्तकौमुदी*, वासुदेवदीक्षितप्रणीतया बालमनोरमाख्यव्याख्यया, ज्ञानेन्द्रसरस्वतीविरचितया तत्त्वबोधिन्याख्यव्याख्यया सह। सम्पादकौ – गिरिधरशर्मा, परमेश्वरानन्दशर्मा। प्रथमतः चतुर्थभागं यावत्। दिल्ली : मोतीलाल बनारसीदास, पुनर्मुद्रितसंस्करणम्, 1998 (प्रथमभागः), 1997 (द्वितीयभागः, तृतीयभागः, चतुर्थभागश्च)।

*New Vārttikas to Pāṇini's Grammar* (*पाणिनीय-व्याकरणेऽभिनव-वार्त्तिकानि*) (A Specimen). Vishva Bandhu and Munishwar Deo. Gen. ed. Visha Bandhu. Vishveshvaranand Institute Publication 583. Vishveshvaranand Indological Series 57. Hoshiarpur : Vishveshvaranand Institute of Sanskrit and Indological Studies, Punjab University, 1972.

*Vyākaraṇ Darśaner Itihās* (An Historical Study of Sanskrit Grammatical Literature in all its Philosophical bearings from critical and comparative points of view). Gurupada Haldar. Kolkata : Sanskrit Book Depot, rpt. 2006, 1st ed. 1350 BS.


~~~~~~~~~~~~~~~~~~~~~~~~

[65] अग्नि. – 355.17-18क

[66] अग्नि. – 355.18

[67] अ इ उ ण्, ऋ ऌ क्, ए ओ ङ्, ऐ औ च्, ह य व र ट्, ल ण्, ञ म ङ ण न म्, झ भ ञ्, घ ढ ध ष्, ज ब ग ड द श्, ख फ छ ठ थ च ट त व्, क प य्, श ष स र्, ह ल्
~~~~~~~~~~~~~~~~~~~~~~~~